कृतके तथा। पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम्। कणादिपिप्पल्यन्तञ्च फलं भुक्त्वा न चाचरेत्। जलस्यापि नरश्रेष्ठ भोजनाद्भेषजादृते। नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा। जलौकागूढ़पादञ्च क्रमिगण्डूपदादिकम्। कामादृष्ट्वा न संस्पृश्य नित्यकर्म्माणि संत्यजेत्। विशेषतः शिवापूजां प्रमीतपितृको द्विजः। यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत्। महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत्। आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं देवयुतञ्च यत्। गुरुमाक्षिप्य विप्रञ्च प्रहृत्यैव च पाणिना। न कुर्य्यान्नित्यकर्माणि रेतःपाते च भैरव!" कालि॰पु॰ ५४ अ॰।

नित्यकर्मणि अशक्याङ्गवैगुण्येऽपि फलनिष्पत्तिर्भवतीति कात्या॰ श्रौ॰ १।२।१८ सूत्रे याज्ञिकदेवकृतसंग्रहे च व्यवस्थापितं यथा

"अथेदं विचार्य्यते द्विप्रकारं कर्म नित्यं काम्यञ्च तत्र नित्यं प्रकृत्येदं विचार्य्यते। किं सर्वाङ्गोपेतं कर्त्तव्यम् उत यावन्त्यङ्गानि कर्त्तुं शक्नोति तावद्भिरङ्गैरुपेतमिति। किं तावत् प्राप्तम् सर्वाङ्गोपेतमेव कर्त्तव्यमिति कुतः भावनांशस्य कथंभावस्य सर्वैरङ्गैः परिपूरणेन सर्वाङ्गोपेतमेव कर्त्तव्यमित्येवं प्राप्ते आह" "विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदात्" सू॰। "नित्ये कर्मणि अग्निहोत्रदर्शपूर्णमासादिके प्रत्यवायपरिहाररूपस्य फलस्य निष्पत्तिर्भवत्येव। अङ्गप्रधानभेदात् यतोऽङ्गानि च प्रधानानि च भिन्नानि नित्येषु चेतिकर्त्तव्यता नास्ति अपूर्वाभावात् अपूर्वप्रयुक्ता हीतिकर्त्तव्यता सा च तस्मिन्नसति न भवितुमर्हति कथमपूर्वाभावः? । फलाभावात् कालान्तरभाविफलसिद्ध्यर्थं ह्यपूर्वं कल्प्यम्। तच्चासति फले कल्पयितुं न शक्यते तस्मान्नित्येषु यागस्यैव भाव्यत्वम् न फलस्य। तस्मात् पौर्णमास्याममावास्यायां वाग्निमुद्दिश्य पुरोडाशस्त्यक्तव्य इत्येतावदुपदिश्यते तेन दृष्टार्थानि यान्यङ्गानि संनिपत्योपकारकाणि यैर्विना प्रधानभूतयागनिष्पत्तिर्न भवति अन्यथानुपपत्त्या तावद्भिरुपेतं प्रधानं कर्त्तव्यम् नाङ्गानि अङ्गाम्नानं तु काम्यप्रयोगार्थम् अतोऽग्निकालपुरोडाशमात्रमादरणीयम् अन्यदङ्गजातमदृष्टार्थं नादरणीयमिति। कथं तर्हीदृशे निष्फले पुरुषस्य प्रवृत्तिरिति? चेत् उच्यते प्रत्यवायानुत्पत्त्यर्था प्रवृत्तिर्न तु फलार्था विहिताकरणाद्धि प्रत्यवायः स्मर्य्यते "अकुर्वन्विहितं कर्म प्रायश्चित्तीयते नरः" इति (मनुना)। अतो नित्यकर्मणो निष्फलत्वादपूर्वाभावादितिकर्त्तव्यता नास्तीति हीनाङ्गस्यैव प्रयोग इति केचित् सिद्धान्तमाहुः। तदेतन्नोपपद्यते कथंभावनातो हि तिस्र आकाङ्क्षा जायते किं, केन, कथमिति तत्र कथमितीतिकर्त्तव्यताकाङ्क्षा नित्येऽप्यस्ति तस्मादत्राप्यस्तीतिकर्त्तव्यता। सत्यम् अस्त्येवेहाप्याकाङ्क्षायाः समानपदोपात्तेन यागेनैव पूरणात्तन्निवृत्त्युपयोगिन्येनेतिकर्त्तव्यता कथमाकाङ्क्षया गृह्यते न त्वदृष्टोपयोगि प्रयाजाद्यङ्गम् अदृष्टस्य साध्यस्याभावादिति चेत् न यागस्य स्वतोऽपुरुषार्थत्वेन प्रवृत्त्यन्यथानुपपत्त्या समानपदोपात्तं यागस्तुत्सृज्य सर्वेषामभिमतस्य प्रत्यवाय परिहारस्येह भाव्यतया कल्पनात्। ननु चेत् सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते, तस्य शरीरारम्भहेतुतया मोक्षविरोधित्वेन मुमुक्षूणामनभिप्रेतत्वात् प्रत्यवायपरिहारस्तु तैरपीष्यत एव कथं? तस्मिन् पापे एतज्जन्मोपार्जिते भवान्तरोपार्जिते वा स्थिते सति तदुपभोगहेतुभूतशरीरारम्भावश्यंभावेन मोक्षाभावात् अतो मोक्षार्थिनाप्यवश्यं पापक्षय एषितव्य एव समीहितफलाय, इतरथाऽप्रक्षीणे पापे फलाप्राप्तेः। तस्मान्नित्यानि कर्माणि पापक्षयस्योपायत्वेन चोद्यमानानीतिकर्त्तव्यता मपेक्षन्त एव। धर्मशास्त्रेषु च यथैवाकरणे प्रत्यवायः स्मृतः तथैव करणादपि पापक्षयः स्मर्य्यते "पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति (मनुः) इत्यादिभिः "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति च"। तस्मान्नित्येऽप्यस्त्येव प्रत्यवायपरिहाररूपं फलम्। तस्मान्नित्यान्यपि कर्माणि सर्वाभिमतस्य तस्य पापक्षयस्योपायत्वेन चोद्यमानानीतिकर्त्तव्यतामपेक्षन्त एव। ततश्च सर्वाङ्गोपेतानामनुष्ठानं कश्चिदपि सर्वदा कर्त्तुं न शक्नोति जीवनादिनिमित्ते च तानि विधीयन्ते निमित्तस्य चैतदेव रूपं यत्तस्मिन् सति नैमित्तिकमवश्यं कर्त्तव्यम्। तेन यावज्जीवं कर्त्तव्यम्। तेन यथा शक्नुयादित्युपबोध्यते तत्रावश्यमन्यतरस्मिन् हातव्ये निमित्ते सति नैमित्तिकस्य कर्त्तव्यत्वं प्रधानवाक्ये श्रूयते तद्यदि कस्यचिदङ्गस्यानुरोधेन सति निमित्ते नैमित्तिकं न क्रियते ततः प्रधानवाक्यविरोधः स्यात् प्रधानमात्रं श्रुत्या निमित्ते विधीयते अङ्गानि तु तदर्थतया प्रकरणेन गृह्यन्ते अतस्तानि प्रधानवाक्यगतावश्यकत्वानुरोधेन यथाशक्त्युपसंहर्त्तव्यानि इतरथा प्रधानस्यावश्यकर्त्तव्यत्वं श्रुतं